पञ्चसप्ताहमासत्र्यहार्द्धमासिकम्। वीजायोवाह्यरत्नस्त्रीदोह्यपुंसां परीक्षणम्"। वीजं व्रीह्यादिवीजम्। अयो लौहम्। वाह्यो बलीवर्द्दादिः। रत्नं मुक्ताप्रवालादि। स्त्री दासी। दोह्यं महिष्यादि। पुमान् दासः। एषां वीजादीनां यथाक्रमेण दशाहादिकः परीक्षाकालो विज्ञेयः। परीक्ष्यमाणे च वीजादौ यद्यसम्यग्बुद्ध्याऽनुशयो भवति तदा दशाहाभ्यन्तर एव क्रयनिवृत्तिः। न पुनरूर्द्ध्वमित्युपदेशप्रयोजनम्। यत्तु मनुवचनम्। "क्रीत्वा विक्रीय वा किञ्चित् यस्येहानुशयो भवेत्। सोऽन्तर्दशाहात् तद्द्रव्यं दद्याच्चैवाददीत वेति"। तदुक्तलौहादिव्यतिरिक्तोपभोगादिविनश्वरग्टहक्षेत्रयानशयनासनादिविषयम्। सर्व्वञ्चैतदपरीक्षितक्रीतविषयम्। यत् पुनः परीक्षितञ्च पुनः प्रत्यर्पणीयमिति समयं कृत्वा क्रीतं तद्विक्रेत्रे न प्रत्यर्पणीयम् तदुक्तम्। "क्रेता पण्यं परीक्षेत प्राक् स्वयं गुणदोषतः। परीक्ष्याभिमतं क्रीतं विक्रेतुर्न भवेत् पुनरिति" मिता०। ततश्च क्रीतस्य, विक्रीतस्य, अन्यथा वा कृतस्य वस्तुनः, असमीचीनत्वबुद्ध्या यः पश्चात्तापः सोऽनुशय इति बोध्यम्। "भुक्तकर्म्मणोऽवशेषे च "कृतात्ययेऽनुशयवान् दृष्टस्मृतिभ्यां यथेतमनेवमिति" शा० सू० स्वर्गार्थिकर्म्मणो भुक्तफलस्यावशेषः कश्चिदनुशयो नाम भाण्डानुसारिस्नेहवत् यथा हि स्नेहभाण्डं विरिच्यमानं न सर्वात्मना विरिच्यते भाण्डानुसार्य्येव कश्चित् स्नेहशेषोऽवतिष्ठते तथानुशयोऽपीति" भा०। "तत्र दृष्टं प्रत्यक्षं श्रुतिः सा हि सानुशयानामेवावरोहं दर्शयति यथा "तद्य इह रमणीयचरणा अभ्यासोह यत्ते रमणीयां योनिमापद्येरन् ब्राह्मणयोनिं वा क्षत्रिययोनिं वा वैश्ययोनिं वा अथ य इह कपूयचरणा अभ्यासोह यत्ते कपूयां योनिमापद्येरन् श्वयोनिं वा शूकरयोनिं चाण्डालयोनिं वेति"। चरणशब्दे नानुशयः (शेषः) सूच्यते। दृष्टश्चायं जन्मनैव प्राणिजातं उच्चावचरूपउपभोगः प्रविभज्यमान आकस्मिकत्वासम्भवात् अनुशयसद्भावं सूचयति अभ्युदयप्रत्यवाययोः सुकृतदुष्कृतहेतुकत्वस्य सामान्यतः शास्त्रेणावगमितत्वादिति च शा०भा०।

**अनुशयाना** स्त्री अनु+शीङ्—शानच्। परकीयनायिकाभेदे। तद्विवरणं नायिकाशब्दे दृश्यम्। अनुतापकर्त्तरि त्रि०।

**अनुशयिन्** पु० अनु+शीङ्—इनि। यावत्कर्म्मक्षयं चन्द्रलोके स्थित्वा सावशेषे एव कर्म्मणि पश्चात्तापान्वितया भूमिलोके जन्मग्रहणायागन्तुं प्रवृत्ते जीवे। "यो यो ह्यन्नमत्ति अनुशयिभिः तदंशेन भावितत्वात् संस्कृतत्वाच्च संश्लिष्टरेतःसिगिति" छा०भा०। तस्य रेतःसिगाकृत्याः पूर्व्वसम्भूतत्वात् तद्रूपेण गर्भाशयमनुप्रविष्टोऽनुशयी रेतःसिगाकृतिर्भवतीति आनन्द०। पश्चात्तापयुते त्रि०। पुरुषस्य अनुशयत एव भुक्तभोगायाः प्रकृतेस्त्यागः श्रुतावप्युक्तः। "अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां स्वरूपाः। अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्य इति "यं संपद्य जहात्यजामनुशयी सुप्तः कुलायं यथेति" भाग०।

**अनुशयी** स्त्री अनुशय्यते पश्चात्तप्यतेऽस्याम्। अनु+शीङ्—अधिकरणे अच् गौरा० ङीष्। पादरोगभेदे, "हरेदनुशयीं वैद्यः क्रियया श्लेष्मविद्रधेरिति" भावप्रकाशः।

**अनुशर** पु० अनुशृणाति अनु+शॄ—कर्त्तरि—अच्। राक्षसे।

**अनुशासन** न० अनुशिष्यते याथार्थ्येन निरूप्यते अनु+शास—भावे ल्युट्। याथार्थ्यज्ञापने, निरूपणे, कर्त्तव्योपदेशे च। "ऋणे देये प्रतिज्ञाते पञ्चकं शतमर्हति। अपह्नुते तद्द्विगुणं तन्मनोरनुशासनमिति" मनुः अनुशासनविरोधादिति वृद्धाः। करणे ल्युट्। तत्प्रतिपादके शास्त्रे यथा "अथ शब्दानुशासनम्"। "अनुशिष्यन्तेऽसाधुशब्देभ्यो विविच्य बोध्यन्तेऽनेनेति करणल्युडन्ततया शास्त्रपदेन सामानाधिकरण्यमिति भाष्यप्रदीपोद्द्योतः। "अथशब्दानुशासनं नाम शास्त्रमधिकृतं वेदितव्यमिति भाष्यम्"। "अथ योगानुशासनमिति" पातञ्जलसूत्रम् योगोऽनुशिष्यतेऽनेन तादृशं शास्त्रमधिकृतमिति तदर्थः उभयत्र अथशब्दस्याधिकारार्थत्वात्तथात्वम् "नामलिङ्गानुशासनमित्यमरः" अनुशासनं धर्मनिरूपणं प्रयोजनमस्य ठक् आनुशासनिकम्। महाभारतान्तर्गतानुशासनपर्व्वणि।

**अनुशासितृ** त्रि० अनुशास्ति याथार्थ्येन कर्त्तव्यमुपदिशति अनु+शास—तृच्। कर्त्तव्योपदेशके। स्त्रियां ङीप्। औणा० तृन्। अनुशास्तापि तत्रार्थे त्रि०। स्त्रियां ङीप्।

**अनुशासिन्** त्रि० अनु+शास—णिनि। कर्त्तव्योपदेशके दण्डयितरि च "एषस्ते नानुशासी राजेति" विक्र०।

**अनुशिष्ट** त्रि० अनु+शास—कर्म्मणि क्त। कृतानुशासने, यस्य हितोपदेशः क्रियते तस्मिन्, दण्डिते च।

**अनुशीत** अव्य० शीते विभ० अव्ययी०। शीते इत्यर्थे, परिमुखा० भवादौ ञ्य। आनुशीत्यः तद्भवादौ त्रि०।

**अनुशीलन** न० अनुक्षणं शीलनं प्रा०स०। सतताभ्यासे अनुक्षणाचरणे "आनुकूल्येन कृष्णानुशीलनं भक्तिरुत्तमेति" भक्तिरसा० कृष्णस्य तद्गुणकीर्त्तनस्यानुशीलनं तदर्थः।